# Kartavirya Mahamantrah

# કાર્તવીર્યમહામન્ત્રઃ

## Document Information

Text title : Kartavirya Mahamantrah

File name : kArtavIryamahAmantraH.itx

Category : deities_misc, mantra

Location : doc_deities_misc

Proofread by : Manish Gavkar

Description/comments : Thanjavur Sarasvati Mahal Series No. 568 kArtavIryArjuna-upAsanA paddhatiH

Latest update : October 28, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 28, 2025

*sanskritdocuments.org*

Kartavirya Mahamantrah

# કાર્તવીર્યમહામન્ત્રઃ

(બ્રહ્મકૃતઃ)

શ્રી ગણેશાય નમઃ ।

બ્રહ્મોવાચ ।

શ‍ૃણુ નારદ સર્વજ્ઞ ગુહ્યાત્ ગુહ્યતરં મહત્ ।
કાર્તવીર્યશ્ચાયં વિષ્ણુઃ ચક્રવર્ત્તી ચ દેવતા ॥ ૧॥

કાર્તવીર્ય મહામન્ત્રઃ ત્રિલોકેષુ સુદુર્લભઃ ।
તસ્ય મન્ત્રમયં કૃત્વા લિખિત્વા બીજમક્ષરમ્ ॥ ૨॥

સ્વર્ણપાત્રે તદારોપ્યેતાભ્રકુથિલમેવ ચ ।
સુદિને યન્ત્રં કુર્યાન્મર્ત્યલોકે ચ માનવાઃ ॥ ૩॥

યન્ત્રારમ્ભે તુ બ્રાહ્મણાય હિરણ્યં ગોધુમં ગુડમ્ ।
આજ્યં ચ દાપયેત્ પ્રાતઃ સર્વકાર્યેષુ સિદ્ધયે ॥ ૪॥

દશબીજાક્ષરેણૈવ પ્રતિષ્ટાં પ્રાણ કારયેત્ ।
કાર્તવીર્યઃ પ્રસન્નોઽસ્મિન્વરં દત્વા યથેસિતમ્ ॥ ૫॥

તન્નામસ્મરણાદેવ લોકો ભવતુ નિર્ભયઃ ।
ત્વં વિદ્યુત્ ત્વં પરઞ્જ્યોતિસ્ત્વં વેદપુરુષોત્તમશ્ચ
(ષોડશોપરિપૂજયેત્)।
કરિષ્યેઽહં ચ મધ્યાહ્ને યથેષ્ટં સુખમિચ્છતિ
યન્ત્રં ચ પૂજયેન્નિત્યમ્ ॥ ૬॥

દૈન્યાત્તાનાસ્તિતદ્ગેહે સદા કાલં ચ સિદ્ધિસ્યાદ્
શત્રુનાશાય નિશ્ચિતમ્ ।
અલક્ષ્મીનાશમાયાતિ વસ લક્ષ્મીર્નિરન્તરમ્ ॥ ૭॥

અધમ ધર્મં જાનાતિ ઇષ્ટપ્રાપ્ત્યૈ ન સંશયઃ ।
મહાવશ્યકરી યુક્તો રાજસમ્માનમેવ ચ

મહાકણ્ટકનાશે ચ નિત્યોત્સાહેતિ મઙ્ગલમ્ ॥ ૮॥

સઙ્ગ્રામે દારુણે વશ્યે શસ્ત્રબાધા ન જાયતે ।
રાજદ્વારે મહાદ્વારે વિજયં પ્રાપ્નુવન્તિ ચ ॥ ૯॥

સાન્તજ્વરવિનાશી ચ ચાતુર્થિકનિવારણમ્ ।
અપમૃત્યુહરે તસ્માદ્દીર્ઘમાયુઃ સુખી ભવેત્ ॥ ૧૦॥

વ્યાઘ્રચોરભયં ચૈવ અગ્નિબાધા તથૈવ ચ ।
સર્પબાધાં ન જાનાતિ સર્વબાધાવિનાશનમ્ ॥ ૧૧॥

ક્ષયં ચ દુર્દરં રોગં સદા રોગેણ પીડિતમ્ ।
યન્ત્રોદકં પિબેન્નિત્યં અષ્ટમાસે તુ જાયતે ॥ ૧૨॥

ગુદવ્યાધિ વિનાશી ચ મૂત્રવ્યાધિ વિનાશનમ્ ।
યન્ત્રોદકં પિબેન્નિત્યં વર્ષમેકં તુ જાયતે ॥ ૧૩॥

દ્વિકાલે પૂજયેદ્યન્ત્રં શુચિર્ભૂત્વા ચ માનવઃ ।
કુર્યાજ્જપં શતદિનં લભેદ્રાજ્યાદિકં ભવેત્ ॥ ૧૪॥

દશપ્રદક્ષિણં નિત્યં મૌનં કુર્યાત્સુતં દૃઢમ્ ।
પુત્રાભાવે ત્વયા નારી લભેત્ કૃતસુતાનિ ચ ॥ ૧૫॥

અર્કશ્ચન્દ્રશ્ચ ભૌમશ્ચ ગુરુઃ કાશ્યશ્શનૈશ્ચરઃ ।
બુધો રાહુશ્ચ કેતુશ્ચ તસ્ય પીડા ન જાયતે ॥ ૧૬॥

પશ્યન્તી મદદૃષ્ટીનાં નિર્બાધા ચ ભવિષ્યતિ ।
યન્ત્રોદકં પિબેન્નિત્યં પુષ્ટિમાન્ નવમાસિકે ॥ ૧૭॥

કણ્ઠે બધ્વા ચ બાહૂનાં બાલગ્રહનિવારણમ્ ।
પૂજયેત્કૃષિમધ્યાહ્ને ઉત્કૃષ્ટં ચ ફલં લભેત્ ॥ ૧૮॥

પ્રાણીયાન્મરણાદન્યે સ્વર્ગલોકે મહીયતે ।
સ્વસ્ય પાપવિનિર્મુક્તો પદં સાયુજ્યમાપ્નુયાત્ ॥ ૧૯॥

ઇતિ ડામકેશ્વતન્ત્રે ઉમામહેશ્વરસંવાદે કાર્તવીર્યયન્ત્રમ્ ।
પ્રસન્ના તાત્કાલિકો ભવતિ ષટ્કોણોપરિ તણ્ડુલં નિધાય ॥ ૨૦॥

આવાહનપૂર્વકં દીપં પ્રજ્વાલ્ય પશ્ચાત્ જપં કુર્યાત્ ।
દીપમધ્યે સાર્થપલાનિ ઘૃતં નિધાય તન્મધ્યે
એકાદશ તન્તુવર્તિકાં કૃત્વા નિધાય દીપં પ્રજ્વાલ્ય ।

મધ્યમપક્ષે સાર્ધદ્વિતીયટઙ્કુઘૃતં નિધાય તન્મધ્યે ચ ।
ચતુઃસૂત્રવર્તિકાં કૃત્વા નિધાય દીપં પ્રજ્વાલ્ય
ઉત્તમ પક્ષે અષ્ટોત્તરસહસ્રજપઃ
કનિષ્ટપક્ષે અષ્ટોત્તરશતં જપઃ
ૐ ફ્રોં ગ્રીં ક્લીં ભ્રૂં આં હ્રીં ક્રોં શ્રીં હું ફટ્ સ્વાહા ।
શ્રી કાર્ત્તવીર્યાર્જુનાય નમઃ ।
અસ્ય શ્રી કાર્તવીર્ય મહામન્ત્રસ્ય
દત્તાત્રેયો ભગવાન્ ઋષિઃ ।
કાર્ત્તવીર્યાર્જુનો વિધુચ્ચક્રવર્તી દેવતા ।
કાં બીજમ્ । કીં શક્તિઃ કૃં કીલકમ્ ।
મમ સકલ કામના સિધ્યર્થે જપે વિનિયોગઃ

## કાર્તવીર્યમન્ત્રઃ । (પાઠભેદઃ ।)

કાર્તવીર્યાર્જુનો વિધુચ્ચક્રવર્તી દેવતા ।
ફ્રોં બીજમ્ ।
ગ્રીં શક્તિઃ ક્રોં કીલકમ્ ।
મમ ચતુર્વિધફલપુરુષાર્થસિદ્ધયે જપે વિનિયોગઃ ।
દત્તાત્રેયપ્રિયાય અઙ્ગુષ્ટાભ્યાં નમઃ ।
માહિમતીનાથાય તર્જનીભ્યાં નમઃ ।
રેવાજલક્રીડાતૃપ્તાય મધ્યમાશ્યાં નમઃ ।
હૈહયાધિપતયે અનામિકાભ્યાં નમઃ ।
સહસ્રબાહવે કનિષ્ઠિકાભ્યાં નમઃ ।
કાર્ત્તવીર્યાર્જુનાય કરતલકરપૃષ્ટાભ્યાં નમઃ ।
એવં હૃદયાદિન્યા સઃ ।
દત્તાત્રેયપ્રિયાય હૃદયાય નમઃ ।
માહિષમતીનાથાય શિરસેસ્વાહા ।
રેવાજલક્રીડાત્તપ્રાપ્તાય શિખાયૈ વષટ્ ॥

હૈહયાધિપતયે કવચાય હુમ્ ।
સહસ્રબાહવે નેત્રત્રયાય વૌષટ્ ।
કાર્તવીર્યાર્જુનાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ।

અથ ધ્યાનમ્ ।
અવ્યાત્સર્વભયાત્પ્રભાકરનિભઃ ખદ્યોતનોદ્યોતિતઃ ।
સ્વર્ણસ્રક્ પરિવીતકન્ધરધરો રક્તાંશુકોષ્ણીષવાન્ ।
નાનાકલ્પવિભૂષિતકરસહસ્રાત્થાબાણાસનઃ ।
બાણાસક્તસહસ્રબાહુરનિશં ભૂવલ્લભો નઃ પ્રભુઃ ॥ ૧॥

સહસ્રબાહું સશરં સચાપં રક્તામ્બરં રત્નકિરીટકુણ્ડલમ્ ।
ચોરારિદુષ્ટભયનાશનમિષ્ટદં તં ધ્યાયેન્મહાવિજૃમ્ભિતકાર્ત્તવીર્યમ્ ॥ ૨॥

દોર્દણ્ડેષુસહસ્રસમ્મિતકરેષ્વેતેષ્વજસ્રં લસત્
    કોદણ્ડેષુશરૈરુદગ્રવિશિખૈરુદ્યત્વિકસ્વત્પ્રભુઃ ।
બ્રહ્માણ્ડં પરિપૂરયંસ્તદખિલં ગણ્ડસ્થલાલોડિતં
    દ્યોતત્કુણ્ડલમણ્ડિતો વિજયતે શ્રીકાતવીર્યપ્રભુઃ ॥ ૩॥

સપ્તદ્વીપૈકનાથઃ સવિતૃસમરુચિઃ સર્વદુષ્ટાન્તકો નઃ
પાયાદજ્ઞાયતાક્ષો રથવરનિલયઃ સ્થૂલકાયો નિશીથઃ
ચાપાન્તેષુત્રિલોકધૃતધનુષાનિરસ્વનૈઃ સેવ્યમાન
શ્રીમાન્ શ્રીકાર્તવીર્યોઽખિલનૃપતિનતાઙ્ગભુજક્ષિપ્રકારી ॥ ૪॥

(પઞ્ચબીજૈઃ પઞ્ચપૂજાં કૃત્વા મૂલં જપેત્ ।)
ૐ ફ્રોં ગ્રીં ક્લીં ભ્રં આં હ્રીં ક્રોં શ્રીં હું ફટ્ સ્વાહા ।
કાર્તવીર્યાર્જુનાય નમઃ ।
(જપં કૃત્વા પુનર્ન્યાસં કુર્યાત્ )॥

ઇતિ બ્રહ્મકૃતઃ કાર્તવીર્યમહામન્ત્રઃ સમ્પૂર્ણઃ ।

Proofread by Manish Gavkar

*Kartavirya Mahamantrah*

pdf was typeset on October 28, 2025

Please send corrections to *sanskrit@cheerful.com*